# E-CONTENT

Prepared by


## MRS. MANASI DAS

**State Aided College Teacher**

**Department of Sanskrit**

## BARJORA COLLEGE

**NAAC ACCREDITED 'B'**

**Affiliated to the Bankura University**

**Barjora, Bankura, West Bengal, Pin-722202**

**Estd. – 1985**


## E-CONTENT FOR

**Semester:** 5th Semester

**Students:** Sanskrit Honours

**Course Code:** AHSNS 501C-11

**Course Title:** Sanskrit Grammar (Siddhantakoumudi Samasa)

## TOPIC OF THE E-CONTENT

**॥ समासशास्त्रे षष्ठीनिषेधकानि सूत्राणि ॥**

**(Samasashastre Shashthinishedhakani Sutrani)**

# ॥ समासशास्त्रे षष्ठीनिषेधकानि सूत्राणि ॥

**भूमिका-** महर्षिः पाणिनिरष्टाध्याय्यां षष्ठीतत्पुरुषसमासनिरूपणप्रसङ्गे **षष्ठी** इति सामान्यसूत्रं विरचय्य षष्ठ्यन्तं सुबन्तेन समस्यत इत्याह । तेन तस्य सूत्रस्यापवादभूतं सूत्रं **तृजकाभ्यां कर्तरि** इति मनसि प्रकल्प्य तदपवादभूतं द्वितीयं षष्ठीसमासविधिसूत्रं **याजकादिभिश्च** इति लिखितम् । अत्रैवाचार्यः कात्यायनः पाणिनिकृतनिषेधसूत्रद्वयं **न निर्धारणे** इति **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन** इति च मनसि कृत्वा षष्ठीसमासविधायकं विशेषं वार्त्तिकद्वयं लिलेख । तच्च वार्त्तिकद्वयं विद्यते **'गुणात्तरेण तरलोपश्चेति वक्तव्यमिति 'कृद्योगा च षष्ठी समस्यते इति वाच्यम्'** इति च ।

षष्ठीसमासनिषेधकसूत्रेषुपाणिनिः **न निधारणे, पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन, क्तेन च पूजायाम्, अधिकरणवाचिना च, कर्मणि च, तृजकाभ्यां कर्तरि, कर्तरि च** इति सप्त सूत्राणि अलिखत् । क्रीडाजीविकयोः नित्यं षष्ठीसमासविधानार्थं **'नित्यं क्रीडाजीविकयो'** रित्येकं सूत्रम् अरीरचत् । अत्रैव वार्त्तिककारः **'प्रतिपदविधाना षष्ठी न समस्यत** इति वाच्यमित्येकं वार्त्तिकं व्यधात् । आहत्य द्वे सूत्रे, द्वे वार्त्तिके चेति चत्वारि षष्ठ्यन्तस्य सुबन्तेन सह समासविधानाय विहितानि । नित्यसमासाय च सूत्रमेकं कृतम् । अनिष्टस्थलेषु च समासवारणाय सप्त सूत्राणि एकं वार्त्तिकञ्चेति आहत्य अष्टौ नियमा निषेधका विहिताः । अधुना षष्ठीसमासनिषेधकनियमानामधस्ताद् आलोचनं विधीयते -

**१. न निर्धारणे** - निर्धारणे या षष्ठी सा न समस्यते इति सूत्रार्थः । **यतश्च निर्धारणम्** इति सूत्रेण निर्धारणे षष्ठीसप्तम्यौ विधीयेते । अनेन सूत्रेण तु निर्धारणषष्ठ्यन्तस्य सुबन्तस्य सुबन्तेन सह प्राप्तः षष्ठीसमासोनिषिध्यते । **नृणां द्विजः** श्रेष्ठ इत्यत्र नृणामिति षष्ठ्यन्तस्य द्विजशब्देन समासो न भवति ।

२. **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन-** पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते इति तत्सूत्रार्थः ।

**क)** पूरणप्रत्ययान्तप्रकृतिकेन सुबन्तेन षष्ठ्यन्तं सुबन्तं न समस्यते । सतां षष्ठइत्याद्यत्रोदाहरणम् ।

**ख)** गुणवाचकशब्दप्रकृतिकेन सुबन्तेन षष्ठ्यन्तं सुबन्तं न समस्यते । काकस्य कार्ण्यम् इत्याद्यत्रोदाहरणम् । **तदशिष्यं संज्ञाप्रमाणत्वात्** इत्यादिनिर्देशाद् गुणेन षष्ठीसमासनिषेधोऽयमनित्यो भवति । तेन **अर्थगौरवं, बुद्धिमान्द्यं** चेत्यादिषु षष्ठीसमासो निर्बाधः।

**ग)** सुहितार्थक (तृप्त्यर्थक ) शब्दप्रकृतिकेन सुबन्तेन षष्ठ्यन्तं न समस्यते । फलानां सुहितः फलानां तृप्तः इत्याद्यत्रोदाहरणम् ।

**घ)** सदन्तशब्दप्रकृतिकेन सुबन्तेन षष्ठ्यन्तं न समस्यते । तौ सत् इति सूत्रेण शतृशानचोः सत्संज्ञा विधीयते । तेन तदन्तविधिना शत्रन्तशब्दप्रकृतिकेन सुबन्तेन शानजन्तशब्दप्रकृतिकेन सुबन्तेन च षष्ठ्यन्तस्य समासनिषेधो विज्ञायते । द्विजस्य कुर्वन् कुर्वाणो वा इत्याद्यत्रोदाहरणम् ।

**ङ)** अव्ययेन षष्ठ्यन्तस्य सुबन्तस्य समसो निषिद्धः । इदञ्चाव्ययं कृदव्ययमेव । तेन तस्योपरि तदुपरि इत्यादिषु समासो निर्बाधः । ब्राह्मणस्य कृत्वा इत्यादि तत्रोदाहरणम् ।

**च)** तव्यप्रत्ययान्तप्रकृतिकेन सुबन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासो न भवति । ब्राह्मणस्य कर्तव्यमित्यादि तत्रोदाहरणम् । तव्यत्प्रत्ययान्तप्रकृतिकेन सुबन्तेन षष्ठ्यन्तस्य सुबन्तस्य समासस्तु भवत्येव । तेन स्वकर्तव्यमित्याद्या: प्रयोगा उपपद्यन्ते ।

**छ)** समानाधिकरणेन षष्ठ्यन्तं सुबन्तं न समस्यते । तक्षकस्य सर्पस्येत्यादि तत्रोदाहरणम् ।

३)**क्तेन च पूजायाम्-** क्तेन च पूजायामिति षष्ठीसमासनिषेधकं सूत्रम् । मति-बुद्धि-पूजार्थेभ्यश्चेति सूत्रेण विहितो यः क्तप्रत्ययस्तदन्तेन (क्तप्रत्ययान्तप्रकृतिकेन सुबन्तेन) षष्ठ्यन्तं

सुबन्तं न समस्यते। राज्ञां मतो बुद्धः पूजितो वा इत्यादि तत्रोदाहरणम्। राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समासो भवत्येव।

**अधिकरणवाचिनाच**'अधिकरणवाचिना च'च इत्यपि षष्ठीसमासनिषेधकं सूत्रम्। अधिकरणवाचिना क्तेन षष्ठी न समस्यते इति सूत्रार्थः। इदमेषामासितं गतं भुक्तं वेत्याद्युदाहरणम्।

५)**कर्मणि च** - कर्मणि चइतीदं सूत्रं षष्ठीसमासनिषेधकम्। उभयप्राप्तौ कर्मणिइति सूत्रेण या षष्ठी विधीयते सा न समस्यते इति सूत्राक्षरार्थः। आश्चर्यो गवां दोहोऽगोपेनेति वाक्ये गवां दोहो गोदोह इति षष्ठीसमासो न भवति।

६)**तृजकाभ्यां कर्तरि - तृजकाभ्यां कर्तरि**इति सूत्रमेतत् षष्ठीसमासं निषेधति। कर्तरि अर्थे यः तृच्प्रत्ययः, अकप्रत्ययश्च विधीयते तेन तृजन्तप्रकृतिकेन सुबन्तेनाकान्तप्रकृतिकेन सुबन्तेन च षष्ठ्यन्तस्य भवति। अपां स्रष्टा, वज्रस्य हर्ता, ओदनस्य इत्यादीनि समासरहितस्थलानामुदाहरणानि। भूभर्ता इत्यादिषु तु याजकादिगणे पत्यर्थकस्यैव भर्तृशब्दस्य ग्रहणाद् **'याजकादिभिश्च'** इत्यनेन समासो भवत्येव। घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहइत्यत्र पद्ये त्रिभुवनविधातुरित्यत्र शेषषष्ठ्या समास इति कैयटः। सुबन्तस्य समासो न पाचक

७) **कर्तरि च** - कर्तरि चइति सूत्रं षष्ठीसमासं निषेधति। कर्तरि षष्ठ्या अकेन न समास इति तदर्थः। भवतः शायिका इत्याद्यत्रोदाहरणम्।

८) **प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम्** - प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम्-इतीदं वार्त्तिकमपि षष्ठीसमासस्य निषेधं करोति। पदं पदं प्रतीति प्रतिपदमिति वीप्सायामव्ययीभावः। प्रतिपदं विधानं यस्याः सा प्रतिपदविधाना। **षष्ठी शेषे**इति सूत्रं विहाय अन्येन**ज्ञोऽविदर्थस्य करणे** इत्यादिना विहिता सर्वैव षष्ठी प्रतिपदविधाना। धातुकारकविशेषं

गृहीत्वैव **ज्ञोऽविदर्थस्य करणे** इत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिविधानत्वम् । एतादृशी प्रतिपदविधाना षष्ठी सुबन्तेन सह न समस्यते । सर्पिषो ज्ञानम् इत्याद्यत्रोदाहरणम् । अत्र **ज्ञोऽविदर्थस्य करणे** इति विहितषष्ठ्याः समासो न भवति ।

एवं सप्त सूत्राणि एकं वार्तिकं च विहाय षष्ठी, याजकादिभिश्च सूत्रद्वयेन गुणान्तरेण तरलोपश्चेति वक्तव्यम्, कृद्योगा षष्ठी च समस्यते इति वाच्यम् चेति वार्तिकद्वयेन षष्ठीसमासो भवति । राजपुरुष, ब्राह्मणयाजकः, सर्वमहान्, इध्मप्रव्रश्चन  चेति क्रमेण उदाहरणानि इति शिवम् ।